९८

(~~चाणक्य नीति शास्त्रम्~~)

चाणक्य नीतिशास्त्र

५२५

३२ पत्राणि

चाणक्यनीतिशास्त्रम्

सं. ४७५८

नीतीमाला
२२

४१५

ना० दामोदरस्येदं पुस्तकं पत्र २२

२२ पत्राणि

१ श्रीगणेशायनमः॥ नीतिशास्त्रं प्रवक्ष्यामि चाणाक्येननुभाषितं। फलविज्ञानमात्रेण
बुद्धिविकसते नृणां॥१॥ प्रथमेनार्ज्जिताविद्या द्वितीयेनार्ज्जितंधनं। तृतीयेनार्ज्जितोधर्मः
चतुर्थे किंकरिष्यति॥२॥ प्रथमेकृषिवाणिज्यं द्वितीये अश्वपोषणं। तृतीयेक्रयविक्रयंच
चतुर्थेराजसेवनं॥३॥ कृते अस्थिगताप्राणा त्रेतायां मांसमेवच। द्वापरे त्वकुमध्येकुर्यात्
कलौ अन्नादिवर्त्तते॥४॥ कृते चलितपते देशे त्रेतायांग्राममेवच। द्वापरे चलितपते गोत्रं कलौ
कर्त्ताचलितपते॥५॥ उत्तमं पाहिली क्षेत्रं तारा क्षेत्रं च मध्यमं। अधमं चिहिट्टी क्षेत्रं कास
क्षेत्रं अधमाधमं॥६॥ उत्तमाः स्वगुणैः ख्याता मध्यमाश्च पितृगुणैः॥ अधमा मातुलैः ख्या चा१

तास्वश्रुरश्चाधमाधमाः ॥७॥ उदके सर्ववीजानि सर्वंदे वाकुनाशने। कलत्रे सर्वसौख्या
नि सर्वदानानि ब्राह्मणे ॥८॥ अग्निहोत्रं फला वेदा नीति शास्त्र फला नृपाः। रतिपुत्र
फला नारी दत्तभुक्तफलं धनं ॥९॥ शांति तुल्यं तपो नास्ति संतोषात्परं सुखं। नास्ति विद्यास
मं दानं नास्ति धर्मो दयापरः ॥१०॥ स धर्मो यत्र नाधर्मः तत्सुखं यत्र नासुखं। ज्ञानं च
यत्र नो ज्ञानं सा गतिर्यत्र नागतिः ॥११॥ आलस्यस्य कुतो विद्या ऽविद्यस्य कुतो धनं।
ऽधनस्य कुतो मित्रं अमित्रस्य कुतो वलं ॥१२॥ यस्मिन्रुष्टे भयं नास्ति तुष्टे नैव ध
नागमः। यदि रुष्टोसि रुष्टोसि त्सरुष्टः किं करिष्यति ॥१३॥ दुर्वलस्य वलं राजा वाल

स्पस्तृत्तिंबलं। बलंमूर्खस्प मोनत्वंतस्करस्पान्टतंबलं॥१४॥जितावधनवत्तादारावस्त्रशा
स्त्रसभाजिता॥जितंकृषिभिद्यारिद्रं गोभिरभ्यागतोजिताः॥१५॥वस्त्रहीनमलंकारं घृतही
नंचभोजनं स्वरहीनंचगांधर्वं भावहीनंचमैथुनं॥१६॥कस्पदोषःकुलेनास्तिव्याधिना
कोनपीडितः।व्यसनंकेननप्राप्तंकस्पसौख्यंनिरंतरं॥१७॥अर्थातुराणांस्वजनोनबंधुः
कामातुराणांनबलंनतेज॥॥भयंनलज्जा॥चिंतातुराणांनसुखं।ननिद्राक्षुधातुराणांनबलं
नतेजः॥१८॥सर्वौषधीनामशनप्रधानंसर्वपेयेषुजलंप्रधानं।सर्वेषुदेवेषुशिवप्रधानंस
र्वेषुगात्रेषुशिरःप्रधानं॥१९॥क्षुधासमानास्तिशरीरवेदनाचिंतासमानास्तिशरीर

समा
शोभणा। विद्यासमानास्ति शरीरभूषणा क्षमा नास्ति शरीर [redacted] रक्षणा।२०।
क्रमेणा शैलः सलिलेन भिद्यते क्रमेणा वल्मीकशिखराभिवर्द्धते। क्रमेण विद्या
विनयेन लभ्यते क्रमेणमोक्षं तपसाभिगम्यते।।२१।। दग्धं दग्धं पुनरपि पुनः
कांचनं कांतिवर्णं घृष्टं घृष्टं पुनरपि पुनश्चंदनं चारुगंधं। छिन्नं छिन्नं पुनरपि पुन
:स्वादुनाइक्षुदंडं प्राणांतेपि प्रकृतिविकृतिर्जायते नोत्तमानां।।२२।। वृक्षं क्षीणा
फलं त्यजंति विहगाः शुष्कं सरः सारसाः पुष्पं पर्युषितं त्यजंति मधुपा दग्धं वनी

तं मृगाः।।निर्द्रव्यं पुरुषं त्यजंति गणिकाः भ्रष्टं नृपं सेवकाः सर्वे कार्यवशाज्ज
नोभिरमते कोकस्य कौ वल्लभः २३ कांतावियोगं स्वजनापमानं स ऋ
णस्य शेषं कुजनस्य सेवा दारिद्र्यभावाद्विमुखा च मित्रं विनाग्नितापं च दहं
ति काया २४।।काके शौचं द्यूतकारे च सत्यं सर्पे क्षांतिं स्त्रीषु कामोपशांतिः।।
क्लीबे धैर्यं मद्यपे तत्त्वचिंता राज्ञा मित्रं केन दृष्टं श्रुतं वा।।२५।।किं गर्जितेन
वृषभेन पराजितेन किं कोकिलेन स्वरकूतेन विना वसंतात्किं कातरेण ब

ड्डशास्त्रपरिग्रहेण किं जीविते न पुरुषेण निरक्षरेण ॥२६॥ धर्मे रतिर्भवति किं बहुभिः कृतेन जीवे
दया भवति किं बहुभिश्च दानैः ॥ शांतं मनो भवति किं बहुभिः कृतैश्च आरोग्यमस्ति यदि किं वि
भवैर्वमासौ ॥२७॥ कुलस्य शीलस्य गुणस्य वात्मनः स्वयं गुणानयः कुर्वंति पंडिताः ॥
न शोभते तस्य हि मैंडुपाडुरं सचामरं छत्रविमोत्मनाधृ ॥२८॥ अन्येन नागो गणा विडुघाः
घुलक्षणायदस्मतल्या भवेभवंति ॥ परस्परालिंगननत्परागणानं नकोन सोरख्यमुवती
जनानां ॥२९॥ उदीरितोर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहंति नोदिताः ॥ अनु
क्तमप्युहति पंडितो जनः परेंगितज्ञानफला हि बुद्धयः ॥३०॥ मांधाता स महीप

नि:कृतयुगे लंकारभूतो गतः सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यांतकः अन्ये
५ चापि युधिष्ठिरप्रभृतयो यावद्भवान् भूपते नैकेनापि समं गता वसुमती मुंच त्वया
यास्यति ॥३१॥ समीहितं यन्न लभामहे वयं प्रभो न दोषः खलु कर्मणो मम । दिवा
प्युलूको यदि नावलोकते तदापराधः कथयं शुमालिनः ॥३२॥ वनेपि सिंहा मृग
मांसभक्षा बुभुक्षिता नैव तृणं चरंति । तथा कुलीना व्यसनाभिभूता न नीच कर्माणि
समाचरंति ॥३३॥ सर्पाः पिवंति पवनं न च दुर्बलास्ते शुष्कैस्तृणैर्वनगजा बलि
नो भवंति । कंदैः फलैर्मुनिगणाः क्षपयंति कालं संतोष एव पुरुषस्य परं निधानं
॥३४॥

यत्रापि तत्रापि गता भवंति हंसा महीमंडलमंडनाय । हानिस्तु तेषां हि सरोवराणां
येषां मरालैः सह विप्रयोगः ॥ ३५ ॥ सिद्धमंत्रौषधं धर्मं गृहछिद्रं च मैथुनं । कुदृष्टं कुश्रु-
तं चैव मतिमान्न प्रकाशयेत् ॥ ३६ ॥ निर्विषेणापि सर्पेण कर्तव्या महती फणा । विषं
भवतु मा भवतु फटाटोपो भयंकरः ॥ ३७ ॥ प्राप्तव्यमर्थं लभते मनुष्यो देवोपि तं लंघयितुं न
शक्तः । तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं न हि तत्परेषां ॥ ३८ ॥ असंभाव्यं न वक्त-
व्यं प्रत्यक्षं यदि दृश्यते । यथा वानरसंगीतं तथैव तरिता शिला ॥ ३९ ॥ शाखामृगस्य शा-
खायाः शाखां गंतु पराक्रमः । यः पुनस्तीर्यतांभोधिं प्रभावः स प्रभवो हरिः ॥ ४० ॥ मा

तकं पितृकं चैव यत्र कन्या प्रदीयते। कुलं पुनाति सा नारी भर्त्तारमनुगच्छति ॥४१॥
मातृकं पितृकं चैव विकलं नैव तु वैल्लम् येत्पज्ञे ति दुराचारा तेषां च पुनरागतिः ॥४२॥
5 श्मशाने नीयमानं तु भर्त्तारमनुयाचते। पदे पदेऽश्वमेधं च जायते नात्र संशयः ॥४३॥
विशाखांतानि मेघानि प्रसूतांतानि योवनं। कुलानां तानि वै राशिमानानां नानि वयाचकः ॥४४
वै सद्भावो नास्ति वेश्यानां स्थिरत्वं नास्ति संपदां। विवेको नास्ति मूर्खाणां विनाशो नास्ति कर्मणां ॥४५।
नि अस्थानि च शरीराणि विभवो नैव शाश्वतः। नित्यं संनिहितो मृत्युः कर्त्तव्यो धर्मसंग्रहः ॥४६
अनित्यस्य शरीरस्य सर्वदोषमयस्य च। दुर्गंधस्य हते न घस्य नाहं पापं करोमि वै ॥४७॥
गो शतेमपि गो स्त्रीरं मानं मपि शतामपि। मंदिरे मंचकस्थानं कस्यार्थे बोधवाहतः ॥४८

सुखस्यानंतरं दुःखं दुःखस्यानंतरं सुखं। सुखदुःखं मनुष्याणां चक्रवत्परिवर्त्तते ॥४९॥
अवध्यो ब्राह्मणो बालः स्त्री तपस्वी च रोगभाक्। येषां चान्नानि भुक्तानि ये च स्युः शरणंगताः ॥५०॥
माता यदि विषं दद्यात्पिता विक्रीयते सुतं। राजा हरति सर्वस्वं का तत्र प्रतिवेदना ॥५१॥
न गार्हस्थ्यात्परो धर्म न सुखं गृहिणीपरं। न तीर्थं पितृमातृभ्यो न देवो केशवात्परः ॥५२॥
चौरो वा यदि चांडालः शत्रुर्वा पितृघातकः। अतिथिः कालसंप्राप्तो सोऽतिथिः स्व॰संक्रमः ५३ र्ग
उत्तमस्यापि वर्णस्य नीचोपि गृहमागतः। बालो वाप्यथवा वृद्धो सर्वस्याभ्यागतो गुरुः ५४
लक्ष्म्यादि व्यवहारं कुलस्य निधनं चित्तस्य संतापनं नीचेनीचतरं प्रमादजननं शीलस्य

विध्वंसनं ।शील्याज्ञानविनाशनस्मृतिहरं शौचस्य निर्नाशनं मद्यं दोषसहस्रमार्गपाति
तः को वा न विद्वान् पिबेत् ॥५५॥ मद्यपानात्परं पापं न भूतं न भविष्यति। मद्यात्यागात्प
रं पुण्यं न भूतं न भविष्यति ॥५६॥ उत्तमं साहसं धैर्यं बुद्धि शक्तिपराक्रमं। षडेते यस्य
तिष्ठंति तस्य देवोपि शंकते ॥५७॥ आयुः कर्माणि वित्तं च विद्यानिधनमेव च। पंचैता
नि हि सृज्यंते गर्भस्थस्यैव देहिनां ॥५८॥ चला चलक्ष्मी चलाः प्राणाश्चलं जीवितयौवनं।
चलाचलेति संसारे धर्म एको हि निश्चलः ॥५९॥ न बीजं अक्षरं नास्ति नास्ति मूलं निरौ
षधं। पृथ्वी निर्धनो नास्ति उपदेशो हि दुर्लभः ॥६०॥ एकतः सर्वपापानि मद्यपानं

6

६

चैकत्तं। एकतः सर्वदा नानि ब्रह्मचर्यं प्रचैकतः॥६१॥ जानत्वेको मृतत्वेको सुजित्वेको
शुभाशुभं। नरयेषु पतत्वेको एको यातिपरांगतिः॥६२॥ तृणं ब्रह्मविदः स्वर्गः शूरस्य
तृणं जीवितं। जितेंद्रस्य तृणं नारी नारीह स्पहे तृणं नृपः॥६३॥ नास्ति काम समो व्याधिर्ना
स्ति मोहः समो रिपुः। नास्ति क्रोध समो वह्नि नास्ति ज्ञान समं सुखं॥६४॥ श्रुत्वा धर्मं वि
जानाति श्रुत्वा त्यजति दुर्मतिं। श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्षं च गच्छति॥६५॥
गुणं पृच्छसि मा रूपं शीलं पृच्छसि मा कुलं। सिद्धिं पृच्छसि मा विद्या भोगं पृच्छसि मा धनं
६६। अगुणस्य हतं रूपं अशीलस्य हतं कुलं। असिद्धस्य हता विद्या अभोगस्य हतं

धनं॥६७॥ गुणो भूषयते रूपं शीलं भूषयते कुलं। सिद्धिर्भूषयते विद्या भोगो भूषयते धनं॥
६८॥ अनभ्यासे विषं शास्त्रं अजीर्णे भोजनं विषं विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषं॥
६९॥ विद्यावंतं धनाढ्यं तं लक्ष्मीवंतं बहुश्रुतं। रणे शूरं च हातारं कनिष्ठं श्रेष्ठमुच्यते॥७०॥
पक्षिणां काकचांडालः पशुचांडालगर्दभः। मनुष्याणां कोपचांडालः सर्वचांडालनिंदकः
७१ भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति। रजसा शुध्यते नारी नदी वेगेन शुध्यति
७२ आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनः ईश्वराज्ज्ञानमिच्छेन्मुक्तिमिच्छेज्जना
र्दनात्॥७३॥ भ्रमंतं पूरयेद्वैश्यं(?) पूरयेद्द्विजः। भ्रमंतं पूरयेद्राजा भ्रमंतं स्त्री विनश्यति ७४
भ्रमंतं

राम
७

२

अस्थिगृहसारंभंअस्थिरंधनयौवनं।अस्थिरंजीवितंलोकेधर्मकीर्त्तियशस्थिरं॥७५॥
यस्यार्थास्तस्यमित्राणियस्यार्थास्तस्यबांधवाः।यस्यार्थःसपुमान्लोकेयस्यार्थःसचपं
डितः॥७६।तादृशीजायतेबुद्धिर्व्यवसायस्यतादृशः।सहायास्तादृशाज्ञेयायादृशीभ
वितव्यता॥७७॥कालःपचतिभूतानिकालःसंहरतेपिच।कालःसुप्तेषुजागर्त्ति
कालोहिदुरतिक्रमः॥७८॥नैवपश्यतिजन्मांधःकामांधोनैवपश्यति।नैवपश्यतिम
दोन्मत्तोअर्थीदोषान्नपश्यति॥७९॥गोत्रसुवर्णकस्यांतंकुलीनंप्रभवस्त्रियः।राज्ञ
स्त्रीब्रह्मशापांतंकुलांतंब्रह्मवर्चसे॥८०॥ यज्ञमूलंभवेद्राज्यंमंत्रमूलंस्थिरं

भवेत्प्रज्ञा मूलं भवत्यर्थे धर्ममूलं चिरायुषं ॥ ८१॥ राज्ञा राष्ट्रकृतं पापं राज्ञः पापं पुरो
हितः। पत्युस्त्री याकृतं पापं शिष्यपापं गुरोरपि ॥ ८२॥ रतो साध्यं रतो साध्यं साध्यं पुत्रकल
8 त्रयोः। साध्यं सर्वे च कर्तव्यं धर्मसाध्यं न कारयेत् ॥ ८३॥ त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे
त्मा ४ कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ८४॥ विषादप्यमृतं ग्राह्यं
अमेध्यादपि कांचनं। नीचादप्युत्तमां विद्यां स्त्रीरत्नं दुःकुलादपि ॥ ८५॥ यतो सत्यस्त
तो लक्ष्मी यतो लक्ष्मी स्ततो हरिः। यतो हरिस्ततो धर्मः यतो धर्मस्ततो जयः ॥ ८६॥ नगरे
वसंति देवाः ग्रामे वसति मानवा। ग्रामकुले पिशाचाश्च ग्राममध्ये तु राक्षसा ॥ ८७॥

८

राम

गोभिर्हीनं किंचिधनं हेमं चार्धधनं स्मृतं। धान्यं च धनमेवस्यात् विद्या भूमी च चाक्षयं॥८८॥ खंडे खंडे मति
र्भिन्ना कुंडे कुंडे नवं पयः॥ जातौ जातौ नवाचारा नवा वाणी मुखे मुखे॥८९॥ अन्यथा वेदपांडित्यं शास्त्रं पंडित
मन्यथा। अन्यथा तत्पदं शांतं लोका क्लेशं च चान्यथा॥९०॥ किं भुक्ते किं भुक्तः कुर्यात् फलिते चैव भूस
तः। अदातारि समृद्धेषु किं कुर्युः कृपजीविनः॥९१॥ वरं बुद्धिर्न सा विद्या विद्या बुद्धिर्गरीयसी॥ बुद्धिहीना वि
नश्यंति यथा ते सिंहकारकाः॥९२॥ विद्या मित्रं प्रवासे च भार्या मित्रं गृहेषु च। व्याधितस्यौषधं मित्रं धर्मो
मित्रं मृतस्य च॥९३॥ आयुधानां धनुश्रेष्ठं मासनानां च मेदिनी। फलानां चाम्रवृक्षस्तु देवानां च म
हेश्वरः॥९४॥ दुर्लभो विष्णुपादो च गंगास्नानं च दुर्लभं। दुर्लभा विप्रगोष्ठी च दुर्लभा भारती कथा॥९५॥
नेतव्या सहशीहूर्ते त्रैलोक्यं सचराचरे॥ याकरोत्यमरस्त्रीणां मानुषैः सह संगमे॥९६॥ ज्ञात

व्याघ्रेक्ष्मो भृत्याबांधवाव्यसनागमे मित्रं चापद्कालेच भार्याश्चविभवक्षये ॥९७॥ पितृमा
तृमयो बाल्योयौवनेवनितामये। पुत्रपौत्रमयः पश्चात् मूढ आत्मामयः क्वचित्॥९८॥ स्त्रीवि
9 नष्टपतिगर्वेणात पः क्रोधेविनश्यति। गावोदूरप्रचारेण शूद्रान्नेचद्विजोत्तमाः ॥९९॥ पृथ्वीगुरुतं
नास्तिमनः शौचं परं नहि। तृणास्वल्पतरं चैव वायुः शीघ्रतरं नहि ॥१००॥ तत्सुता ये पितुर्भक्ता मा प
तापुत्रपोषकः। तन्मित्रंयस्यविश्वासो स्वदेशो यत्र जीवति॥१०१॥ नुष्यंत्या मंत्रिणो विप्रा मयूरा
घनगर्जितैः। साधवः परकल्याणै खलाः परविपत्तिषु॥१०२॥ पृषतः शोषयेदर्कं जठरेणो हु
ताशनः। स्वामिनः सर्वभावेषु परलोके मया त्वया॥१०३॥ प्रत्यक्षे गुरवः स्तुत्या परोक्षे मि
त्रबांधवाः। कर्मांते दासभृत्याश्च पुत्रो नैव मृताः स्त्रियः॥१०४॥ शैले शैले न माणिक्यं मौक्तिकं

नगजेगजे।साधवोनहिसर्वत्र चंदनंनवनेवने॥१०५॥ कृषिःपरिःकृतामृतिमात्तपक्षेणकन्य
का।पितुःपरीक्षतामूद्वौशोचाचारगाढ्या ह्नगाः॥१०६॥ विनयंराजपुत्रेभ्यःपंडितेभ्यःसुभाषितं।
अनृतंघूतकारेभ्यःस्त्रीभ्यःशिक्षेनकैतवं॥१०७॥ नास्तिसत्यंसदा चौरेनास्तिसत्यंहृषलीपतिः
मद्यपास्यहृशंनास्तिहूतेचतत्तयंनहि॥१०८॥ जनानर्थरंयूतंमोक्तिकेशंतज्ञातिनाशीलंवि
नश्यतेयेनतस्मात्यूतंपरित्यजेन्नृ॥१०९॥ विषादकल्पहोद्दा निकोपमानवृषधर्मः।पश्चान्यं
मत्सरंशोकःसर्वयूतस्यबांधवाः॥११०॥ कर्षैःशंकुःसहबाक्यैःस्तोवंचितापुरे।कुर्वंतिघू
तकारस्यकर्णाशावादिकंध्रुवं॥१११॥ नश्रियावर्ततेतत्रयत्रघूतंप्रवर्त्तते।नहृसोज्ञायते
तत्रविशंतेयत्रवकुंदका॥११२॥ सत्यंशौचंसमंशीलंसंयमंनियमंतथा।प्रविशंतिमहिमुक्ता

विरूपो नांगनागृहे ॥११३॥ जननी जनको भ्राता पुत्रो मित्रस्तथैव च । नश्यंति वल्लभा तस्य दा
रकार्थस्य वल्लभा ॥११४॥ पंच स्वहृदये धूर्तैः परेत्वसहभावना । परं निखेवतोत्वज्ञा परमस्था
यते यशः ॥११५॥ उत्तमो सहसांगत्वं पंडिते सह संकथा । अलुब्धैः सह मित्रं च कुर्वाणो नावसी
दति ॥११६॥ गावो गंधेन पश्यंति वेदैः पश्यंति ब्राह्मणाः । चरैः पश्यंति राजन्यो चक्षुभ्या
अ मितरे जने ॥११७॥ अनात्मव्ययकर्ता च अनाथ कलहप्रियः । आतुरः सर्वभक्षी च नरः
शीघ्रं विनश्यति ॥११८॥ अवंशपतितो राजा मूर्खपुत्रो हि पंडितः । निर्धनेन धनं प्राप्तं
तृणवन्मन्यते जगत् ॥११९॥ जीवंतोपि मृताः पंच श्रूयंते किल भारत । दरिद्री व्याधि

तोमूर्खः प्रवासी नित्यसेवकः ॥ १२० ॥ गते शोको न कर्त्तव्यो भविष्यं नैव चिंतयेत् । वर्त्तमानेन
कालेन वर्त्तयंति विचक्षणाः ॥ १२१ ॥ अग्रतश्च विधाता च पृष्ठतश्च यमस्तथा । द्वावेतौ सुख
माधत्ते यद्भविष्यति भावि च ॥ १२२ ॥ धर्मार्थकाममोक्षाणां यस्यैकोपि न विद्यते । अजागलस्त
नस्येव तस्य जन्म निरर्थकम् ॥ १२३ ॥ यौवनं जरया ग्रस्तं शरीरं व्याधिपीडितं । मृत्युराक्रम
ते प्राणान् तृष्णैका तरुणायते ॥ १२४ ॥ वलिभिर्मुखमाक्रांतं पलितैरंकितं शिरः । गात्राणि शि
थिलायंते तृष्णैका तरुणायते ॥ १२५ ॥ सुवर्णपुष्पितां पृथ्वीं विचिन्वंति त्रयो जनाः । शूरश्च कृ
तविद्यश्च यश्च जानाति सेवनं ॥ १२६ ॥ संतोषस्त्रिषु कर्त्तव्यः स्वदारे भोजने धने । त्रिषु चैव न
कर्त्तव्यो दाने चाध्ययने तपः ॥ १२७ ॥ एकाक्षरप्रदातारं यो गुरुं नाभिमन्यते । श्वानयोनि

श्रुतं गत्वा चांडाले त्वभिजायते ॥१२७॥ युगांते चलते मेरुः कल्पांते सप्तसागराः । साधवः
प्रतिपन्नार्थान चलंति कदाचन ॥१२८॥ बहूनामपि सत्वानां समवायो रिपुंजयः । वर्षं
धाराधरो मेघः तृणैरपि धनेरपि ॥१३०॥ पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितं । मूढैः
पाषाणखंडेषु रत्नसंज्ञा न लिप्यते ॥१३१॥ जलैतैलं खलेगुह्यं पात्रे दानं मनागसि । प्राज्ञेशा
॥ स्त्रं स्वयं याति विस्तारं वस्तुशक्तितः ॥१३२॥ यस्य चित्तं द्रवीभूतं कृपया सर्वजंतुषु । तस्य ज्ञा
नं च मोक्षं च किं जटं भस्मवश्री ॥१३३॥ इंद्रियाणां जले भूरे धर्मे चरति पंडितः । मन्य
वादी भवेद् ज्ञाता भवति वानवा ॥१३४॥ चापल्यं लोभ्यता कोपं मूर्खपैशुन्यमत्सरं ८८
तिस्त्री बालत्वं नृपं च मूर्खं बालं च सर्पं च ॥१३५॥ वाग्वादमर्थसंबंधं परोक्षे दारदर्शनं । यदि

राम

सेह्विपुत्लोपीतिंग्ज्ञीरिशांतत्रनकारयेत्॥१३६॥वर्जयेत्तस्तुदुःसंवासेअन्ननिष्टस्यचदर्शनंवि
वादंसहमित्रेणदूरतःपरिवर्ज्जयेत्॥१३७॥परवादंपरस्वेचपरहास्यंपरस्त्रियः।पर
वेश्मनिवासेचनकुर्वीतकदाचन॥१३८॥गोपोषीधनवापीचश्वय्रवाकूवीजसंग्रही।च
त्वारोनावसीदंतिपंचमोग्राममयाजकः॥१३९॥त्यजेद्दुर्जनसंसर्गंभजसाधुसमागमं।कु
रुपुण्यमहोरात्रंस्मरनित्यमनित्यतां॥१४०॥पुनर्दारापुनर्वित्तंपुनर्मित्रंपुनःसुतं।पुन
रत्रशुभान्तंशरीरंपुनःपुनः॥१४१॥दानेतपसिशौर्येचविज्ञानेविनयेनये।विस्म
योनहिकर्त्तव्योबहुरत्नावसुंधरा॥१४२॥दूरस्थोनपिदूरस्थोयोवैमनसिवर्त्तते।हृदये
वर्त्ततेयन्नसमीपस्थोहिदूरतः॥१४३॥अग्निरापस्त्रियोमूर्खाःसर्पोराजकुलानिच

चा०नी

नित्यं यत्नेन सेव्यानि सद्यः प्राणहराणि षट् ॥१४४॥ मातृवत्परदाराणि परद्रव्याणि लो
ष्ठवत्। आत्मवत्सर्वभूतानि यः पश्यति स पंडितः ॥१४५॥ आत्मस्यैव च कुतो मान्यं निर्मा
न्यस्य कुतो यशः। यशोरहितदेवस्य जीवितान्मरणं वरं ।१४६। अधमा धनमिच्छंति धनं
मानं च मध्यमाः। उत्तमा मानमिच्छंति मानो हि महतां धनं ॥१४७॥ आत्मापराधवृक्ष
12 स्य फलान्येतानि देहिनां। दारिद्र्यरोगदुःखानि धनानि व्यसनानि च ॥१४८॥ गृहेष्व
र्था निवर्त्तंते श्मशानादपि बांधवाः। शरीरं तीर्थमादाय पुण्यपापैः समं गतः ॥१४९
धर्माख्याने श्मशाने च रोगिणां या ... र्भवेत्। यदि सा निश्चला बुद्धिः को न मुच्येत बंधनो
॥१५०॥ उत्पन्नपरितापस्य बुद्धिर्भवति यादृशी। तादृशी यदि पूर्वं स्यात् कस्य तस्मात् फलो भवेत् ॥

१२

॥१५१॥ आत्मानं भावयेन्नित्यं ज्ञानेन विनयेन च। न पुनः म्रियमाणस्य पश्चात्तापो भविष्यति
॥१५२॥ उपदेशो हि मूर्खाणां प्रकोपाय न शांतये। पयःपानं भुजंगानां केवलं विषवर्द्धनं॥
॥१५३॥ दूराध्वानपरिश्रांतं दृष्ट्वा तं गृहमागतं। अनभ्यर्च्य स्त्रियो भुंक्ते सोपि चांडाल उच्यते
॥१५४॥ मूर्खशिष्योपदेशेन दुष्टास्त्रीभरणेन च। द्विषतां संप्रयोगेन पंडितोप्यवसीदति
॥१५५॥ दुर्जनः परिहर्तव्यो विद्यालंकारितो यदि। मणिना भूषितः सर्पः किमसौ न भयंकरः
॥१५६॥ शकटं पंचहस्तेन दशहस्तेन वाजिनः। हस्ती हस्तसहस्रेण देशत्यागेन दुर्जनः॥
॥१५७॥ चंदनादपि संभूता दहत्येव हुताशनः। वशिष्ठः कुलजातोपि यः खलु खलु एव च
॥१५८॥ दुर्जनं प्रियवादी च यच्च विश्वासकारणं। मध्वं वसति जिह्वाग्रे हृदये च हलाहलं।१५८

यस्य क्षेत्रे नदी रेखा भार्या च परसंगता। खलानां कंटकानां च द्विविधा हि प्रतिक्रिया॥१६०॥
आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुविग्रहे। राजद्वारे श्मशाने च यस्तिष्ठति स बांधवा॥१६१॥ दु
ष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः। स सर्पे गृहे वासो मृत्युरेव न संशयः॥१६२॥ अवि
13 नीतो भृत्यजनो नृपतिरदाता शठानि मित्राणि। अविनयवती च भार्या मस्तकशूलानि
चत्वारि॥१६३॥ अनुचितकर्मारंभो स्वजनविरोधो बलीयसा स्पर्द्धा। प्रमदाजनविश्वा
सो मृत्युद्वाराणि चत्वारि॥१६४॥ अनृतं साहसं माया मूर्खत्वमतिलोभता। अशौचं
निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः॥१६५॥ चर्मखंडे द्विधा भिन्ने अपानोद्गारवासि
तं। तत्र मूढा क्षयं यांति प्राणैरपि धनैरपि॥१६६॥ स्त्रीणां द्विगुणमाहारो लज्जाता

सांचतुरगुणा॥ षड्गुणोव्यवसायश्च कामंचाष्टगुणंस्मृतम् १६७ नदीपात
यते कूलं नाचपानयंते कुलं। नारीणांचनदीनांच स्वछंदललितागतिः १६८ कु
पात्रेरमतेनारीगिरौवर्षतिमाधवः॥ नीचमाश्रयते लक्ष्मीप्राज्ञोप्रायेणनिर्द्धनः
१६९॥ नविश्वसेत्तत्कृष्णसर्पस्यखड्गपाणिनंविश्वसेत। नायुक्ताचपत्नाचित्ता
स्त्रीचरित्रंनविश्वसेत॥१७०॥ कवयःकिंनकुर्वंतिकिंनजानंतियोगिनः। मद्य
पाःकिंनजल्पंतिकिंनकुर्वंतियोषितः॥१७१॥ अश्वप्लुतंमेघवगर्जितंचस्त्री
णांचरित्रंभवितव्यताच। अवर्षणंचाप्यतिवर्षणंचदेवानजानातिकुतोमनुष्यः॥

१७२ नराज्ञासममित्रत्वं नसर्पो निर्विषः क्वचित्। नकुलं निर्मलं तत्र स्त्रीजनो य
त्र गायते॥१७३॥ ज्वलंति सार्द्धमन्येन पश्यंत्यन्यं सविभ्रमाः। हृदये चिंतयन्त्यन्यं
14 प्रियः का नाम योषितः॥१७४॥ नामृतं ना विषं किंचित् एकां मुक्त्वा नितंबिनी
सैवामृतलता रक्ता विरक्ता विषवल्लरी॥१७५॥ रात्मा हरति सर्वस्वं प्राणानादपि वि
रागता। आहार विषसे मेति कष्टे कष्टं खलु स्त्रियः॥१७६॥ विरक्ता प्राणसं
देहं धनहानि पराभवं। करोति सर्वमप्येवं वशा नारी न दुर्जनः॥१७७॥ वृध
त मेल्लगांधेन थ्रवता मूत्रशोणितां दुष्टांध विक्लृते नैव शोणितानां धीक्लृतं ज्ञगत
१७८ १४
राम

दर्शनात् हरते चित्तं स्पर्शनात् हरते बलं । संभोगात् हरते वीर्यं नारी प्रत्यक्षराक्षसी ॥
१७९ ॥ द्वौ चेष्टुः साधने चैव अष्टौ ध्यानसमाविधौ । निर्विचारं भजंते ये योषित स्नेनका
रयेत् ॥ १८० ॥ माता वैरी पिता शत्रुर्बालो येन न पाठितः । सभामध्ये न शोभंते हंसमध्ये बको
यथा ॥ १८१ ॥ लाडयेत्पंच वर्षाणि दश वर्षाणि ताडयेत् । प्राप्ते षोडशमे वर्षे पुत्रं मित्रवदा
चरेत् ॥ १८२ ॥ लाडनात् बहवो दोषा ताडनात् बहवो गुणाः । तस्मात्पुत्रं च शिष्यं च ताड
येन्न च लाडयेत् ॥ १८३ ॥ पठि पुत्र कुमारस्य अपठो भारवाहकः । पठिते पूज्यते लोके अप
ठ पुत्र दिने दिने ॥ १८४ ॥ तावद्भयस्य भेतव्यं यावद्भयसमागमं । आगतं तु भयं दृष्ट्वा

हृतेव्य मशंकितैः॥१८५॥ मित्रद्रोही कृतघ्नस्य ये च विश्वासघातकः। तेनरा नरकं यां
ति यावच्चंद्रदिवाकरः॥१८६॥ अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च। तस्मात्पुत्रमुखं दृ
15 ष्ट्वा स्वर्गं वांछंति मानवाः॥१८७॥ क्वचित्स्वर्गौरिणी नारी क्वचिज्जायायते सती। मध्यमा भा
वे च क्वाचित् सर्वत्र त्रिविधा स्त्रिया॥१८८॥ लक्ष्मी लक्षणहीना च जातिहीना सरस्वती
कुपात्रे रमते नारी गिरौ वर्षति माधवः॥१८९॥ नराणां नापितो धूर्त्तः पक्षिणां चैव वायसः
दंष्ट्रिणां च शृगालस्या न्वश्वेतपट्ट तपस्विनां॥१९०॥ किं करोति नरः प्राज्ञः प्रेर्यमाणः स्वक
र्मभिः। प्रागेव हि मनुष्याणां बुद्धिः कर्मानुसारिणी॥१९१॥ ब्रह्महा स्त्रण हाश्विद्धा वैतौ तुल

याङ्खवेत्ताकल्पांतेब्रह्मह मुह्निः स्रशाह्मनैव मुध्यति ॥१९२॥ गीतशास्त्रविनोदेन कालोगच्छति धी
मतां। मू सनेन द्विमूर्खाणां निद्रया कलहेन वा ॥१९३॥ गांधर्वं गीतसंयुक्तं तांबूलं भारती
कथा। इष्टाभार्या प्रियंमित्रं अपूर्वाणि दिने दिने ॥१९४॥ किं करोमि नरः प्राज्ञः शूरो वा अथ पं
डितः। देवो यस्य छल्ला चेषी करोति विफलाः क्रियाः ॥१९५॥ ते पुत्रा ते पितुर्भक्ताः स पिता पुत्र
पोषकः। तन्मित्रं यस्य विश्वासो स देशो यत्र जीवति ॥१९६॥ तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यव
सायिनं। अर्द्धराज्यहरं भृत्यं यो न हन्यात्स हन्यते ॥१९७॥ मुखं पद्मदलाकारं वाचा चंदनशीतलं॥
हृदयं कर्त्तसंयुक्तं त्रिविधं धूर्तलक्षणं ॥१९८॥ न काष्ठे विद्यते देवो न पाषाणे न चामृन्मये। भावेषु विद्य
ते देवो तस्माद्भावो हि कारणं ॥१९९॥ दुर्बलानामनाथानां बालवृद्धतपस्विनां। अन्यायपरिभू

तान्नो सर्वेषां पार्थिवो गतिः ॥२००॥ भृंगी फलानि पद्मानि राजहंसतुरंगमाः। स्थानभ्रष्टा सुशोभंते
सिंहाः सत्पुरुषा गजाः ॥२०१॥ राजा कुलवधूर्विप्रा नियोगी मंत्रिणस्तथा। स्थानभ्रष्टा न शोभंते दंता
केशा नखा नराः ॥२०२॥ स्थानत्यागं करिष्यंति सिंहाः सत्पुरुषा गजाः। तत्रैव निधनं यांति काकाः का
पुरुषा मृगाः ॥२०३॥ पुष्पैरपि न योद्धव्यं किं पुनर्निशितैः शरैः। युद्धे विजयसंदेहो प्रधानपुरुषक्ष
यः ॥२०४॥ जिते च लभ्यते लक्ष्मीर्मृते चैव सुरांगनाः। क्षणविध्वंसिनी काया का चिंता मरणो
रणे ॥२०५॥ कृते प्रतिकृतं कुर्यात् हन्यते प्रति हन्यते। न स्यादोषं न पश्यामि दुष्टे दोषं समाच
रेत् ॥२०६॥ शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधिः। प्रभाते मैथुनं निद्रा षडेते बलनाश
नं ॥२०७॥ सर्वासंबंधिनः सर्वे पुत्रदारपशुस्तथा। मरणक्षये क्षयं यांति कालत्रप्रतिवेदना। २०८

16

१६

राम

संसारकटुवृक्षस्य द्वे फले अमृतोपमौ। सुभाषितरसास्वादं संगतिः स्वजने जने।२०९
अदाता पुरुषस्त्यागी स्वजनं त्यज्य गच्छति। दातारं कृपणं मन्ये मृतो प्यर्थं न मुंचति।२१०
आज्ञाभंगो नरेंद्राणां विप्राणां मानखंडना। पृथक्शय्या च नारीणां अशस्त्रवध उ
च्यते।२११॥ विद्वानेव हि जानाति विद्वज्जन परिश्रमं। न हि वंध्या हि जानाति गुर्वी प्र ग्र४
सववेदनां॥२१२॥ धनधान्यप्रयोगेषु विद्यासंग्रहणेषु च। आहारे व्यवहारेषु त्य
क्तलज्जः सुखी भवेत्॥२१३॥ यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किं। लोच
नाभ्यां विहीनस्य दर्पणः किं करिष्यति॥२१४॥ वरं हालाहलं पीतं सद्यः प्राणहरं विषं।

राम

17

नतु वरं धनाढ्यस्य भ्रूभंगकुटिलं मुखं ॥२१५॥ सर्वनाशे समुत्पन्ने अर्द्धं त्यजति पंडि
तः। अर्द्धेन कुरुते कार्यं सर्वनाशो हि दुस्तरः ॥२१६॥ निद्रा चैव कुतस्तेषां ये ऋणव्या
धिपीडिताः। अविधेयकलत्रा ये चान्ये कृतवैरिणः ॥२१७॥ षट्कर्णो भिद्यते
मंत्रः चतुःकर्णः स्थिधार्यते। द्विकर्णस्य च मंत्रस्य ब्रह्माप्यंतं न गच्छति ॥२१८॥ परि
णापरिविख्यातो निर्गुणोपि गुणी भवेत्। शक्रोपि लघुतां याति स्वयं प्रख्यापितै
र्गुणैः ॥२१९॥ मितं ददाति पिता माता मितं भ्राता मितं सुतः। अमितस्य च दातारं भ
र्त्तारं का न पूजयेत् ॥२२०॥ न विश्वसेत्कुमित्रस्य मित्रस्यापि न विश्वसेत्। कदा

चित्तः कुपितो मित्रं सर्वगुह्यं प्रकाशयेत्।।२२१।। परोक्षे कार्यहंतारं प्रत्यक्षे प्रियवा
दिनं। वर्जयेत्तादृशं मित्रं विषकुंभं पयोमुखं।।२२२।। नाहं काको महाराज हंसोहं
विमले जले। नीचसंगप्रसंगेन मृत्युरेव न संशयः।।२२३।। उपानहमुखभंगोपि
दूरतो वापि दुर्जनः। उपकारी गृहीतेन शत्रूणां प्रथमुद्धरेत्।।२२४।। सकृद्दुष्टं
तथा मित्रं पुनः संधातुमिच्छति। यथा स मृत्युं गृह्णाति गर्भमश्वतरी यथा।।२२५।
दुर्जनः प्रियवादी च नैतो विश्वासकारणं। मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषं।२२६
शास्त्रं शास्त्रं कृषिविद्या अन्यथा योगेन जीवितं। सुदृढमपि कर्त्तव्यं कृष्णसर्पमुखं यथा।

कृषिर्विद्या धनश्चैव नारी प्रथमयौवनं। सुहृदमपि कर्तव्यं क्रमशः सर्वमुखं यथा
॥२२८॥ प्रथमेऽहनि चांडाली द्वितीये ब्रह्मघातिनी। तृतीये रजकी ज्ञेया [illegible] ह
चतुर्थेऽहनि शुध्यति॥२२९॥ यावत्पुण्योदये पुंसां तावत्सर्वेऽपि किंकराः। पुण्य
18 च्छेदे च संजाते बांधवास्तेऽपि विद्विषाः॥२३०॥ वनानि दहतो वह्निः सखा भवति मा
रुतः। स एव दीपनाशाय कृशे कस्यास्ति सौहृदं॥२३१॥ गुरुरग्निर्द्विजातीनां व
र्णानां ब्राह्मणो गुरुः। पतिरेव गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः॥२३२॥ न स्पृशे १८
नाधिकारी स्यान्नाकामी मंडनप्रियः। नादग्धं च प्रियं ब्रूते स्फुटवक्ता न वंचकः॥

२३३॥ आलस्योपहृता विद्या परहापहृता स्त्रियाः॥ मंदवीजं हतं क्षेत्रं हतं सैन्यं नना
यकं॥२३४॥ अभ्यासात्वर्धते विद्या कुलं शीलेन धार्यते॥ गुणैर्मित्राणि धार्यंते को
क्रोधो तो विधार्यते॥२३५॥ वित्तेन धार्यते धर्मे विद्यायोगेन रक्षते मदनं रक्षते रूपं कुलं
शीलेन रक्षते॥२३६॥ नाशनेव वर्ज्जयेत्विद्वान कामी न स्त्रियं त्यजेत्। न चेत्वनैर्थते वाद्दि
निर्मघे न तृषात्यजेत्॥२३७॥ असाध्यं नारभेत्प्राज्ञ अकार्यं नैव कारयेत्। अमृतं नै
व जल्पेन अभक्ष्यं नैव भक्षयेत्॥२३८॥ सत्यपूतं भवेद्वाक्यं वस्त्रपूतं जलं पिबेत्। अद्दा
पूतं वदेद्धर्मं मनःपूतं समाचरेत्॥२३९॥ हृथो हृष्टि समुद्रेषु हृथा न्नेषु भोजनं। हृथा

दानं धनाढ्यं च रथादीपं दिवापिवा ॥२४०॥ कुमित्रे नास्ति विश्वासो कुभार्यायां च कुतः सुखं

कुपात्रे नास्ति निर्वृत्ति कुदेशे नास्ति जीवितं ॥२४१॥ रिपु राजा ग्निसर्प लां दुष्टास्त्रैव न सं

गिनां। नदीनां शस्त्रहस्तानां विश्वासो नैव कारयेत् ॥२४२॥ अधमा धनमिच्छंति मा

नमिच्छंति सेवकः। उत्तमा मान मिच्छंति मानो पि महतां धनं ॥२४३॥ उग्रसंकुशते जंतु देवः

सर्वत्र कारणां। समुद्रं मे धनाल्लो भे हरिर्लक्ष्मी हरो विषं ॥२४४॥ पूर्वदत्तेषु या विद्या पू

र्वदत्तेषु यद्धनं। पूर्वदत्तेषु या कन्या अग्रे तिष्ठति तिष्ठति ॥२४५॥ इच्छितं च मनः सर्वं कस्य

संपद्यते सुखं। दैवायत्तं जगत्सर्वं तस्मात्संतोषमाचरेत् ॥२४६॥ यथा धेनुसहस्रेषु

राम

१२

वत्सोधावतिमातरं।तथापूर्वकृतंकर्मकर्तारमनुगच्छति॥२४७॥अवश्यंभाविभावानांभवं
तिसर्वतामपि।महेश्वरस्यनग्नत्वंसमुद्रशयनंहरेः॥२४८॥परोक्षेदेवताःसर्वेराजाप्रत्य
क्षदेवताः।प्रसादंचप्रकोपंचप्रत्यक्षेदृश्यतेफलं॥२४९॥मुनेरपिवनस्थस्यस्वानिकर्मा
णिकुर्वतः।उत्पद्यंतेत्रयःपुंसांमित्रोदासीनशत्रवः॥२५०॥श्रेयांसिबहुविघ्नानिभवंतिम
हतामपि।अश्रेयसिप्रवृत्तानांक्वापियांतिविनायकाः॥२५१॥उभाभ्यांगतिरेकैवगर्भस्थ
चारिणस्यच।हसंतिधारयेद्गर्भंरुदंतिप्रतिमुंचति॥२५२॥जीवतोवाक्यकरणात्क्षयाहेभूरि
भोजनात्।गयायांपिंडदानाच्चत्रिभिःपुत्रस्यपुत्रता॥२५३॥इतिशास्त्रप्रयुक्तानांशंकिता
नांपदेपदे।परापवादभीरूणांनभवंतिनभूतयः॥२५४॥अजरामरवत्प्राज्ञोविद्यामर्थंच
चिंतयेत्।गृहीतइवकेशेषुमृत्युनाधर्ममाचरेत्॥२५५॥किंकुलेनविशालेनविद्याहीनेन

देहिनां।विद्यावान्पूज्यते लोके नैव विद्याः परिभूयते॥२५६॥ रूपयौवनसंपन्ना विशालकुलसंभ
वः।विद्याहीना न शोभंते निर्गंधा इव किंशुकाः॥२५७॥ धनहीनो न हीनस्तु धनवान्निर्मलं कुलं
२० विद्याहीनाश्च यः कश्चित्स हीनः सर्ववस्तुषु॥२५८॥ कथयंति न याचंति भिक्षाहारा गृहेषु
च।सद्योस्तितन्मुदातव्यं अदत्तफलमीदृशं॥२५९॥ परप्राणैर्निजप्राणान्सर्वे रक्षंति जंत
वः।नरप्राणोपरप्राणाः एको जीमूतवाहनः॥२६०॥ उत्पद्यंते विपद्यंते मद्विधाश्च द्रुतं नवः।
परार्थबंधकस्पायाता ह्दृशाम्भूवाकुरः॥२६१॥ दरिद्रि दीयते दानं समृद्धानां कदाचन
व्याधितस्यौषधं पथ्यं नु व्याधितस्य च नौषधं॥२६२॥ अग्निकुंभसमा नारी घृतकुंभस
मो नरः।उभयोरपि संयोगः कस्य विश्वसते नरः॥२६३॥ अंकमारुह्य सुप्तस्य हंतु
का नाम पौरुषं।विश्वासप्रतिपन्नानां वंचनैश्च विदुश्चिना॥२६४॥ यस्य नास्ति २०

राम

स्वयंप्रज्ञा शास्त्रंतस्य करोतिकिं।लोचनाभ्यांविहीनस्यदर्पणः किंकरिष्यति॥२६५॥
मूर्खस्यपरिहर्त्तव्यःप्रत्यक्षोद्विपदःपशुः।विध्यतेवाक्यशल्येनअदृष्टःकंटकोयथा॥
२६६॥सद्भावेनहितुष्यंतिदेवाःसत्पुरुषाद्विजाः इतराद्दानपानेनवाक्यदानेनपं
डिताः॥२६७॥ संगःसर्वात्मनात्याज्यःसचेत्त्यक्तुंनशक्यते।ससद्भिःसहकर्त्तव्योसं
तःसंगस्यभेषजं॥२६८॥ क्षमाखड्गंकरेयस्यदुर्जनःकिंकरिष्यति।अतृणेपतितो
वह्निःस्वयमेवोपशाम्यति।नष्टंमृतमतिक्रांतंनानुशोचंतिपंडिताः।अतिक्रांत
मतिक्रांतंनष्टंनष्टंमृतंमृतं॥२६९॥ अभ्रछायास्तृणादग्निपराधीनंचयत्सुखं
अज्ञानेषुचवैराग्यंक्षिप्रमेतद्विनश्यति॥२७१॥देवताराधानदानेविद्याभ्या

२।

समदोषके। सुक्ष्मायां च मो यत्नः कर्तव्या हितकांक्षिणः॥२७२॥ एषड्विषयो
गामी चिरं जीवितं चातकः। पिपासया च म्रियत्येव याति त्रैयपुरंदरः॥२७३॥ अहो बत
विचित्राणि चरितानि यथा भवेत्। लक्ष्मीतृष्णा च मम्यंते तद्धारेणान मैत्ति च॥२७४
मृत्स्नेहो भयं नत्र स्नेहदुःखस्य भाजनं। स्नेहमूलानि दुःखानि तस्मिन्त्यक्त्वे प
रं सुखं॥२७५॥ अस्मदाय समर्थो वा तेन स्त्री किं करिष्यति। अनवरो पनितो वा हि
स्वयमेवोपरंस्यति॥२७६॥ राज्ञि धर्मिणि धर्मिष्ठाः पापे पापे समाः समाः। लोका
स्तदनुकुर्वंते यथा राजा तथा प्रजाः॥२७७॥ वंध्याय विषयासंगं बुद्धिर्निर्विषयं म
नः एतदेवमनुष्याणां कारणं धर्ममोक्षयेत्॥२७८॥ यस्य संग्रहणी भार्या वा स

लीच विशेषतः। सततं स्तनकं तस्य ब्रह्महत्या दिने दिने ॥२७९॥ एकेनापि सपुत्रेण सिंही
स्वपतिनिर्भया। स एव दशभिः पुत्रैर्भारं वहति गर्द्दभिः ॥२८०॥ किं जातैर्बहुभिः पुत्रैः शो
कसंतापकारकैः। अयमेव कुलालंबी यत्रै विरमते कुलं ॥२८१॥ स च सुंच पल्लत्य को मा
नं परवतितद्दयी। उभयो। पतिं तं दृष्ट्वा मोनं सर्वार्थ साधनं ॥२८२॥ पुस्तके पर याधीतं नाधी
तं गुरुसन्निधौ। ब्रजने हि इदं सर्वं तारण भर्खव स्त्रियः ॥२८३॥ सिद्धसारेण यो वैद्यः कात
त्रमनु पंडितः। ज्ञाति षड्षांस्त्रिन त्रयः पुंसो विडंबना ॥२८४॥ अद्याघो बोयदि स्या
त्तां धज्ञ या किं प्रयोजनं। तावेव यद्दिन स्यात्तं प्रज्ञया किं प्रयोजनं ॥२८५॥ वद्धधाराहू
पांडित्यं रूपक्रीतं च मैथुनं। भोजनं च पराधीनं त्रयः पुंसां विडंबना ॥२८६॥ रसा

१२ पुनरागत्य यथा नुर्वां दीह्रिदृता। योगिनो विषयासक्ता त्रयः पुंसो विडंबना ॥२८७
सर्वेशा साधनी प्रज्ञा क्रोधेन सा विनश्यति। क्षमायी कुरुते कार्यं क्रोधेन तद्विनश्य
ति ॥२८८॥ असंतुष्टा द्विजा नष्टाः संतुष्टा चैव पार्थिवाः। सलज्जा गणिका नष्टा नि
र्लज्जा च कुलस्त्रियः ॥२८९॥ सर्वत्र सचयो भीरुः स्वकर्मबलगर्विताः। निजकर्मपरित्य
क्ताः पापैः सर्वत्र शंकिताः ॥२९०॥ नाहारं चिंतयेत्प्राज्ञः कर्ममेकं हि चिंतयेत्।
आहारो हि मनुष्याणां जन्मना सह जायते ॥२९१॥ इति श्री नीतिशास्त्रं समा
प्तम्॥ श्रीरस्तु॥

ज्ञानादामोदरस्येदं पुस्तके